# Shri Sharada Ashtakam

# શ્રીશારદાષ્ટકમ્

## Document Information

Text title : Sharada Ashtaka 4

File name : shAradAShTakam4.itx

Category : devii, aShTaka, devI, sarasvatI

Location : doc_devii

Author : mahAkavi kumArAnAsan

Transliterated by : NA

Proofread by : NA, D.K.M. Kartha

Description/comments : gAyanaH : Vinod Anandan

Latest update : November 20, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 20, 2022

*sanskritdocuments.org*

# શ્રીશારદાષ્ટકમ્

વ્યાપ્યવાઙ્મયમિદં જગત્સ્થિતા
    વ્યાતનોતુ મમ દેવતાશ્રિયમ્ ।
કાપિહસ્તપરિવાદિનીગળત્
    કાકળીલયકલાકુતૂહલા ॥ ૧॥

સાત્વિકીગુણવિલાસચિત્રિતા
    યાત્મનઃ પરમપાવનીકલા ।
સા શિવાનિ વિદધાતુ શારદા
    શારદેન્દુકિરણોજ્જ્વલાકૃતિઃ ॥ ૨॥

દેવિ! નૈવ મતભેદનિર્ગમાન્
    દુર્ગમાઞ્જિગમિષામ્યહં પથઃ ।
ત્વાં પરાં ગતિમુપૈમિ કાતરઃ
    શારદે શ્રુતિવિશારદાર્ચિતે ॥ ૩॥

અમ્બ યોગિમૃગિતાં પરાભિધાં
    ત્વાં વિભિન્નપરિણામસુન્દરીમ્ ।
પુષ્કલાર્થવિભવામુપાસ્મહે
    સ્ફોટદર્શિતવિચિત્રવિભ્રમામ્ ॥ ૪॥

લુપ્તરાગસરણીસ્સુનિશ્ચિતા
    લોકસઙ્ગ્રહવિધૌ પટીયસી ।
કાચનામ્બ! ધિષણાભવન્મયી
    કર્મકૌશલજુષા નિષેવ્યતે ॥ ૫॥

અવ્યપેક્ષસુભગા પ્રગીયસે
    ત્વં મયામ્બ! ધુતભેદ વેદના ।
સા સ્વયં રસમયી રતિઃ પરા
    પ્રત્યગાત્મપરમાત્મગોચરા ॥ ૬॥

રુદ્ધચિત્તમરુતાં સદામ્બ મે
    રોચસે સ્થિતિરહો મહોદયા ।
પૂર્ણબોધપરિબાધિતભ્રમા
    પૌરુષી પૃથગલિઙ્ગસાક્ષિણી ॥ ૭॥

અસ્તિભાતિસુખમાત્રલક્ષણે
    યન્મરૌ જગદિદં મરીચિકા ।
સા સદા હૃદિ મયામ્બ! નિષ્કલા
    સંવિદૌપનિષદં નિધીયસે ॥ ૮॥ ।

જય નારાયણગુરુપ્રિયે શિવગિરીશ્વરી શારદે ।
ચતુરાસ્યાક્ષિશરચ્ચન્દ્રમરીચિકે ॥

ઇતિ શ્રી મહાકવિ કુમારનાશાન્ કૃત શ્રીશારદાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Sharada Ashtakam*

pdf was typeset on November 20, 2022

Please send corrections to *sanskrit@cheerful.com*